

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## तृतीयकाण्डे द्वितीयः प्रश्नः

### पवमानग्रहादीनां व्याख्यानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यो वै पवमानानामन्वारोहान् विद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽवच्छि-
द्यते श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे स्वस्ति मा सम्पारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु
त्वाऽऽरभे स्वस्ति मा सम्पारय सघाऽसि जगतीछन्दा अनु त्वाऽऽरभे स्वस्ति मा सम्पारये-
त्याहैते ॥ [१] ॥ वै पवमानानामन्वारोहास्तान्य एवँव्विद्वान्यजतेऽनु पवमानाना रोहति न
पवमानेभ्यो ऽवच्छिद्यते यो वै पवमानस्य सन्ततिँव्वेद सर्वमायुरेति न पुराऽऽयुषः प्र मीयते
पशुमान् भवति विन्दते प्रजाम्पवमानस्य ग्रहा गृह्यन्तेऽथवा अस्यैतेऽगृहीता द्रोणकलश आध-
वनीयः पूतभृत् तान् यदगृहीत्वोपाकुर्यात् पवमानँव्वि ॥ [२] ॥ च्छिन्द्यात् तँव्विच्छिद्यमान-
मध्वर्योः प्राणोऽनु वि च्छिद्येतोपयामगृहीतोऽसि प्रजापतये त्वेति द्रोणकलशमभि मृशेदि-
न्द्राय त्वेत्याधवनीयँव्विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतम्पवमानमेव तथ् सन्तनोति सर्वमायुरेति
न पुराऽऽयुषः प्रमीयते पशुमान् भवति विन्दते प्रजाम् ॥ [३] ॥

(एते वि द्विचत्वारिꣳशच्च) ॥ १ ॥

त्रीणि वाव सवनान्यथ तृतीयꣳ सवनमवलुम्पन्त्यनꣳशु कुर्वन्त उपाꣳशुꣳ हुत्वोपाꣳशुपा-
त्रेऽꣳशुमवास्य तन्तृतीयसवनेऽपिसृज्याभि षुणुयाद् यदाप्याययति तेनाꣳशुमद्यदभिषुणोति ते

नर्जींषि सर्वाण्येव तथ् सवनान्यꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोति द्वौ समुद्रौ वितता-
वजूर्यौ पर्यावर्तेते जठरेव पादाः। तयोः पश्यन्तो अति यन्त्यन्यमपश्यन्तः ॥ [४] ॥ सेतु-
नाऽति यन्त्यन्यम्॥ द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान्। तिरोधायै-
त्यसितँव्वसानः शुक्रमा दत्तेअनुहाय जार्यै॥ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा
एतम्महायज्ञमपश्यन् तमतन्वताग्निहोत्रवँव्रतमकुर्वत तस्माद् द्विव्रतः स्याद् द्विर्ह्यग्निहोत्रञ्जुह्वति
पौर्णमासँय्यँज्ञमग्नीषोमीयं ॥ [५] ॥ पशुमकुर्वत दाश्र्यँय्यँज्ञमाग्नेयम्पशुमकुर्वत वैश्वदेवम्प्रा-
तस्सवनमकुर्वत वरुणप्रघासान् माद्ध्यन्दिनꣳ सवनꣳ साकमेधान् पितृयज्ञन्त्र्यंबकाꣳस्तृती-
यसवनमकुर्वत तमेषामसुरा यज्ञमन्ववाजिगाꣳसन् तन्नाऽन्ववायन् तेऽब्रुवन्नद्ध्वर्तव्या वा इमे
देवा अभूवन्निति तदद्ध्वरस्याऽद्ध्वरत्वन्ततो देवा अभवन् पराऽसुरा य एवँव्विद्वान्थ् सोमेन
यजते भवत्यात्मना परा ऽस्य भ्रातृव्यो भवति ॥ [६] ॥

(अपश्यन्तोऽ ग्नीषोमीयं मात्मना परा त्रीणि च) ॥ २ ॥

परिभूरग्निम्परिभूरिन्द्रम्परिभूर् विश्वान् देवान् परिभूर् माꣳ सह ब्रह्मवर्चसेन स नः पवस्व
शङ्गवे शञ्जनाय शमर्वते शꣳ राजन्नोषधीभ्योऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य
ददितारः स्याम। तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे॥ प्राणाय मे वर्चोदा
वर्चसे पवस्वापानाय व्यानाय वाचे ॥ [७] ॥ दक्षक्रतुभ्याञ्चक्षुर्भ्याम्मे वर्चोदौ वर्चसे पवेथाꣳ
श्रोत्रायाऽऽ*त्मनेऽङ्गेभ्य आयुषे वीर्याय विष्णोरिन्द्रस्य विश्वेषान्देवानाञ्जठरमसि वर्चोदा मे
वर्चसे पवस्व कोऽसि को नाम कस्मै त्वा काय त्वा यन्त्वा सोमेनातीतृपँय्यन्त्वा सोमेनामी-
मदꣳ सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैर् विश्वेभ्यो मे रूपेभ्यो
वर्चोदा ॥ [८] ॥ वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे॥ बुभू-
षन्नवेक्षेतैष वै पात्रियः प्रजापतिर् यज्ञः प्रजापतिस्तमेव तर्पयति स एनन्तृप्तो भूत्याऽभि पवते
ब्रह्मवर्चसकामोऽवेक्षेतैष वै पात्रियः प्रजापतिर् यज्ञः प्रजापतिस्तमेव तर्पयति स एनन्तृप्तो
ब्रह्मवर्चसेनाभि पवत आमयाव्य ॥ [९] ॥ वेक्षेतैष वै पात्रियः प्रजापतिर् यज्ञः प्रजापति-
स्तमेव तर्पयति स एनन्तृप्त आयुषाऽभि पवतेऽभिचरन्नवेक्षेतैष वै पात्रियः प्रजापतिर् यज्ञः

प्रजापतिस्तमेव तर्पयति स एनन्तृप्तः प्राणापानाभ्यांव्वाचो दक्षक्रतुभ्याञ्चक्षुर्भ्याꣳ श्रोत्राभ्या-मात्मनोऽङ्गेभ्य आयुषोऽन्तरेति ताजक् प्र धन्वति ॥ [१०] ॥

(वाचे रूपेभ्यो वर्चोदा आमयावी पञ्चचत्वारिꣳशच्च) ॥ ३ ॥

स्फ्यः स्वस्तिर्विघ्न नः स्वस्तिः परशुर् वेदिः परशुर् नः स्वस्तिः। यज्ञिया यज्ञकृतः स्थते माऽस्मिन्यज्ञ उप ह्वयद्ध्वमुप मा द्यावापृथिवी ह्वयेतामुपाऽऽ*स्तावः कलशः सोमो अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तां नमोऽग्नये मखघ्ने मखस्य मा यशोऽर्यादित्याह-वनीयमुप तिष्ठते यज्ञो वै मखो ॥ [११] ॥ यज्ञंव्वाव स तद्हन् तस्मा एव नमस्कृत्य सदः प्रसर्पत्यात्मनोऽनार्त्यै नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीद्ध्रन्तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नम इन्द्राय मखघ्न इन्द्रियम्मे वीर्यम्मा निर्वधीरिति होत्रीयमाशिष मेवैतामा शास्त इन्द्रियस्य वीर्यस्यानिर्घाताय या वै ॥ [१२] ॥ देवताः सदस्यार्तिमाऽर्पयन्ति यस्ता विद्वान् प्रसर्पति न सदस्यार्तिमार्च्छति नमोऽग्नये मखघ्न इत्याहैता वै देवताः सदस्या-र्तिमाऽर्पयन्ति ता य एवंव्विद्वान् प्रसर्पति न सदस्यार्ति मार्च्छति दृढे स्थः शिथिरे समीची माऽꣳहसस्पातꣳ सूर्यो मा देवो दिव्यादꣳहसस्पातु वायुरन्तरिक्षा ॥ [१३] ॥ दग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्यो देवी द्वारौ मा मा सन्ताप्तन्नमः सदसे नमः सदसस्पतये नमः सखीनाम्पुरोगाणाञ्चक्षुषे नमो दिवे नमः पृथिव्या अहे दैधिषव्योदतस्तिष्ठाऽन्यस्य सदने सीद योऽस्मत् पाकतर उन्निवत उदुद्वतश्च गेषम्पातम्मा द्यावापृथिवी अद्याह्नः सदो वै प्रस-र्पन्तं ॥ [१४] ॥ पितरोऽनु प्र सर्पन्ति त एनमीश्वरा हिꣳसितोः सदः प्रसृप्य दक्षिणार्द्धम्प-रेक्षेताऽगन्त पितरः पितृमानहय्युष्माभिर् भूयासꣳ सुप्रजसो मया यूयम्भूयास्तेति तेभ्य एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै ॥ [१५] ॥

(मखो वा अन्तरिक्षात् प्रसर्पन्तं त्रयस्त्रिꣳशच्च) ॥ ४ ॥

भक्षेहि माऽऽविश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वायेहि वसो पुरो-वसो प्रियो मे हृदोऽस्यश्विनोस्त्वा बाहुभ्याꣳ सघ्यासन्नृचक्षसन्त्वा देव सोम सुचक्षा अव

ख्येषम्मन्द्राऽभिभूतिः केतुर् यज्ञानाँव्वाग् जुषाणा सोमस्य तृप्यतु मन्द्रा स्वर्वाच्यदितिरनाहतशीर्ष्णी वाग् जुषाणा सोमस्य तृप्यत्वेहि विश्वचर्षणे ॥ [१६] ॥ शंभूर् मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दख्षाय रायस्पोषाय सुवीरतायै मा मा राजन् वि बीभिषो मा मे हार्दि त्विषा वधीः। वृषणे शुष्मायाऽऽयुषे वर्चसे॥ वसुमद्गणस्य सोम देव ते मतिविदः प्रातस्सवनस्य गायत्रछन्दस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भख्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माद्ध्यन्दिनस्य सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराशꣳसपीतस्य ॥ [१७] ॥ पितृपीतस्य मधुमत उपहूतस्योपहूतो भख्षयाम्यादित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भख्षयामि॥ आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य सङ्गथे॥ हिन्व मे गात्रा हरिवो गणान् मे मा वि तीतृषः। शिवो मे सप्तर्षीनुप तिष्ठस्व मा मेऽवाङ्नाभिमति ॥ [१८] ॥ गाः॥ अपाम सोमममृता अभूमाऽदर्श्म ज्योतिरविदाम देवान्। किमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य॥ यन्म आत्मनो मिन्दाऽभूदग्निस्तत् पुनराऽहार् जातवेदा विचर्षणिः॥ पुनरग्निश्चख्षुरदात् पुनरिन्द्रो बृहस्पतिः। पुनर् मे अश्विना युवञ्चख्षुरा धत्तमख्योः॥ इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य ॥ [१९] ॥ शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भख्षयामि॥ आपूर्याः स्थाऽऽमा पूरयत प्रजया च धनेन च॥ एतत् ते तत ये च त्वामन्वेतत् ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागम्मन्दद्ध्वं नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः ॥ [२०] ॥ स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिँल्लोके स्थ युष्माꣳस्तेऽनु येऽस्मिँल्लोके मान्तेऽनु य एतस्मिँल्लोके स्थ यूयन्तेषाँव्वसिष्ठा भूयास्त येऽस्मिँल्लोकेऽहन्तेषाँव्वसिष्ठो भूयासम्प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ॥ [२१] ॥ यत् कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम्॥ देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्यप्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भख्षो अश्वसनिर्यो गोसनिस्तस्य ते पितृभिर् भख्षंकृतस्योपहूतस्योपहूतो भख्षयामि ॥ [२२] ॥

(विश्वचर्षणे त्रिष्टुप्छन्दस इन्द्रपीतस्य नराशंसपीतस्या ऽति स्तुतस्तोमस्य जीवाय नमो वः पितरो बभूव चतुश्चत्वारिंशच्च) ॥ ५ ॥

महीनाम्पयोऽसि विश्वेषान्देवानान्तनूर् ऋद्ध्यासमद्य पृषतीनाङ्ग्रहम्पृषतीनां गहोऽसि विष्णोर्हृदयमस्येकमिष विष्णुस्त्वाऽनु वि चक्रमे भूतिर् दद्ध्ना घृतेन वर्द्धतान्तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरम्पृश्नियै दुग्धय्यावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः। तावन्तमिन्द्र ते ॥ [२३] ॥ ग्रहं सहोर्जा गृह्णाम्यस्तृतम्॥ यत् कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर् यच् छ्वाऽवमृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर् यथ् स्कन्देद् यजमानः प्रमायुकः स्यात् पशवो वै पृषदाज्यम्पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्यꣳ स्कन्दति यत् पृषदाज्यं पुनर् गृह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यम्प्राणो वा ॥ [२४] ॥ एतस्य स्कन्दति यस्य पृषदाज्यꣳ स्कन्दति यत् पृषदाज्यम्पुनर् गृह्णाति प्राणमेवास्मै पुनर् गृह्णाति हिरण्यमवधाय गृह्णात्यमृतव्वै हिरण्यम्प्राणः पृषदाज्यममृतमेवास्य प्राणे दधाति शतमानम्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यश्वमव घ्रापयति प्राजापत्यो वा अश्वः प्राजापत्यः प्राणः स्वादेवास्मै योनेः प्राणन्नि-र्मिमीते वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यꣳ स्कन्दति वैष्णव्यर्चा पुनर् गृह्णाति यज्ञो वै विष्णुर् यज्ञेनैव यज्ञं सन्तनोति ॥ [२५] ॥

(ते पृषदाज्यम्प्राणो वै योनेः प्राणं द्वाविंशतिश्च) ॥ ६ ॥

देव सवितरेतत् ते प्राऽऽ*ह तत् प्र च सुव प्र च यज बृहस्पतिर् ब्रह्माऽऽयुष्मत्या ऋचो मा गात तनूपाथ् साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतञ्च सत्यञ्च वदत स्तुत देवस्य सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जम्मह्यꣳ स्तुतन्दुहामा मा स्तुतस्य स्तुतङ्गम्याच्छस्त्रस्य शस्त्र ॥ [२६] ॥ मस्यूर्जम्मह्यं शस्त्रन्दुहामा मा शस्त्रस्य शस्त्रङ्गम्यादिन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम्॥ सा मे सत्याऽऽशीर् देवेषु भूयाद्ब्रह्मवर्चसम्माऽऽगम्यात्॥ यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे। स देवानामधिपतिर् बभूव सो अस्मां अधिपतीन् करोतु

वयꣳ स्याम पतयो रयीणाम्॥ यज्ञो वा वै ॥ [२७] ॥ यज्ञपतिन्दुहे यज्ञपतिर् वा यज्ञन्दुहे स यः स्तुतशस्त्रयोर् दोहमविद्वान्यजते तय्ँयज्ञो दुहे स इष्ट्वा पापीयान् भवति य एनयोर् दोहव्ँविद्वान् यजते स यज्ञन्दुहे स इष्ट्वा वसीयान् भवति स्तुतस्य स्तुतमस्यूर्जम्मह्यꣳ स्तुतन्दुहामा मा स्तुतस्य स्तुतङ्गम्याच्छस्त्रस्य शस्त्रमस्यूर्जम्मह्यꣳ शस्त्रन्दुहा मा मा शस्त्रस्य शस्त्रङ्गम्यादित्याहैष वै स्तुतशस्त्रयोर् दोहस्तय्ँ एवव्ँविद्वान्यजते दुह एव यज्ञमिष्ट्वा वसीयान् भवति ॥ [२८] ॥

(शस्त्रं वै शस्त्रन्दुहां द्वाविꣳशतिश्च) ॥ ७ ॥

श्येनाय पत्वने स्वाहा वट्थ्स्वयमभिगूर्ताय नमो विष्टंभाय धर्मणे स्वाहा वट्थ्स्वयमभिगूर्ताय नमः परिधये जनप्रथनाय स्वाहा वट्थ्स्वयमभिगूर्ताय नम ऊर्जे होत्राणाꣳ स्वाहा वट्थ्स्वयमभिगूर्ताय नमः पयसे होत्राणाꣳ स्वाहा वट्थ्स्वयमभिगूर्ताय नमः प्रजापतये मनवे स्वाहा वट्थ्स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट्थ्स्वाहा वट्थ्स्वयमभिगूर्ताय नमस्तृंपन्ताꣳ होत्रा मधोर् घृतस्य यज्ञपतिमृषय एनसा ॥ [२९] ॥ ऽऽहुः। प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध॥ सन्नस्ताभ्याꣳ सृजतु विश्वकर्मा घोरा ऋषयो नमो अस्त्वेभ्यः। चक्षुष एषाम्मनसश्च सन्धौ बृहस्पतये महि षद् द्युमन्नमः॥ नमो विश्वकर्मणे स उ पात्वस्मानन्यान्थ्सोमपान् मन्यमानः। प्राणस्य विद्वान्थ् समरे न धीर एनश्चकृवान् महि बद्ध एषाम्॥ तव्ँविश्वकर्मन् ॥ [३०] ॥ प्र मुञ्चा स्वस्तये ये भक्षयन्तो न वसून्यानृहुः। यानग्नयोऽन्वतप्यन्त धिष्णिया इयन्तेषामवया दुरिष्ट्यै स्विष्टिन्नस्ताङ्कृणोतु विश्वकर्मा॥ नमः पितृभ्यो अभि ये नो अख्यन् यज्ञकृतो यज्ञकामाः सुदेवा अकामा वो दक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट। यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यास्तेभ्यो यो दक्षिणान्न ॥ [३१] ॥ नयेदैभ्यो वृश्च्येत यद्वैश्वकर्मणानि जुहोति सदस्यानेव तत् प्रीणात्यस्मे देवासो वपुषे चिकित्सत यमाशिरा दंपती वाममश्नुतः। पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः॥ आशीर्दाया दंपती वाममश्नुतामरिष्टो रायः सचताꣳ समोकसा। य आऽसिचथ् सन्दुग्धङ्कुंभ्या सहेष्टेन यामन्नमतिञ्जहातु सः॥ सर्पिर्ग्रीवी ॥ [३२] ॥ पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य। सहजानिर् यः सुमखस्यमान इन्द्रायाऽऽ*शिरꣳ सह कुंभ्याऽदात्॥ आशीर् म ऊर्ज-

मुत सुप्रजास्त्वमिषन्दधातु द्रविणꣳ सवर्चसम्। सञ्जयन् क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो अन्याꣳ अधरान्थ् सपत्नान्॥ भूतमसि भूते मा धा मुखमसि मुखम्भूयासं द्यावापृथिवीभ्यान्त्वा परि गृह्णामि विश्वे त्वा देवा वैश्वानराः ॥ [३३] ॥ प्र च्यावयन्तु दिवि देवान् दृꣳहान्तरिक्षे वयाꣳसि पृथिव्याम्पार्थिवान् ध्रुवन्ध्रुवेण हविषाऽव सोमन्नयामसि। यथा नः सर्वमिज्जगद-यक्ष्मꣳ सुमना असत्। यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत्। यथा नः सर्वा इद्दिशोऽस्माकङ्केवलीरसन्न् ॥ [३४] ॥

(एनसा विश्वकर्मन् यो दक्षिणान्न सर्पिर्ग्रीवी वैश्वनरा श्चत्वारिꣳशच्च) ॥ ८ ॥

यद्वै होताऽद्ध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातस्सवनम्प्रतिगीर्य त्रीण्येतान्यक्षराणि त्रिपदा गायत्री गायत्रम्प्रातस्सवनङ्गायत्रियैव प्रातस्सवने वज्रमन्तर् धत्त उक्थवाँवाचीत्याह माद्ध्यन्दिनꣳ सवनम्प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टु-भम्माद्ध्यन्दिनꣳ सवनन्त्रिष्टुभैव माद्ध्यन्दिने सवने वज्रमन्तर् धत्त ॥ [३५] ॥ उक्थवाँवा-चीन्द्रायेत्याह तृतीयसवनम्प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वरो वज्रो वज्रे-णैव तृतीयसवने वज्रमन्तर् धत्ते ब्रह्मवादिनो वदन्ति स त्वा अद्ध्वर्युः स्याद् यो यथास-वनम्प्रतिगरे छन्दाꣳसि संपादयेत् तेजः प्रातस्सवन आत्मन् दधीतेन्द्रियम्माद्ध्यन्दिने सवने पशूꣳस्तृतीयसवन इत्युक्थशा इत्याह प्रातस्सवनम्प्रतिगीर्य त्रीण्येतान्यक्षराणि ॥ [३६] ॥ त्रिपदा गायत्री गायत्रम्प्रातस्सवनम्प्रातस्सवन एव प्रतिगरे छन्दाꣳसि सम्पादयत्यथो तेजो वै गायत्री तेजः प्रातस्सवनन्तेज एव प्रातस्सवन आत्मन् धत्त उक्थवाँवाचीत्याह माद्ध्य-न्दिनꣳ सवनम्प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभम्माद्ध्यन्दिनꣳ सवनम्मा-द्ध्यन्दिन एव सवने प्रतिगरे छन्दाꣳसि सम्पादयत्यथो इन्द्रियवै त्रिष्टुगिन्द्रियम्माद्ध्यन्दिनꣳ सवन ॥ [३७] ॥ मिन्द्रियमेव माद्ध्यन्दिने सवन आत्मन् धत्त उक्थवाँवाचीन्द्रायेत्याह तृतीय-सवनम्प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः पशवो जागतन्तृतीयसवनन्तृतीय-सवन एव प्रतिगरे छन्दाꣳसि सम्पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनम्पशूनेव तृती-यसवन आत्मन् धत्ते यद्वै होताऽद्ध्वर्युमभ्याह्वयत आव्यमस्मिन् दधाति तद्यन्ना ॥ [३८] ॥

पहनीत पुराऽस्य सँव्वथ्सराद् गृह आ वेवीरञ्छोꣳसा मोद इवेति प्रत्याह्वयते तेनैव तदप हते
यथा वा आयताम्प्रतीख्षत एवमद्ध्वर्युः प्रतिगरम्प्रतीख्षते यदभि प्रतिगृणीयाद् यथा ऽऽयतया
समृच्छते तादृगेव तद्यदर्द्धर्चाल् लुप्येत यथा धावद्भ्यो हीयते तादृगेव तत् प्रबाहुग्वा ऋत्वि-
जामुद्गीथा उद्गीथ एवोद्गातृणा ॥ [३९] ॥ ऋचः प्रणव उक्थशꣳसिनाम्प्रतिगरोऽद्ध्वर्यूणाय्ँय
एवँव्विद्वान् प्रतिगृणात्यन्नाद एव भवत्याऽस्य प्रजायाँव्वाजी जायत इयँव्वै होताऽसावद्ध्वर्युर्
यदासीनः शꣳसत्यस्या एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो दुहे यत्
तिष्ठन् प्रतिगृणात्यमुष्या एव तदद्ध्वर्युर् नैति ॥ [४०] ॥ तिष्ठतीव ह्यसावथो अमूमेव तेन
यजमानो दुहे यदासीनः शꣳसति तस्मादितःप्रदानन्देवा उप जीवन्ति यत् तिष्ठन् प्रतिगृणाति
तस्मादमुतःप्रदानम्मनुष्या उप जीवन्ति यत् प्राङासीनः शꣳसति प्रत्यङ् तिष्ठन् प्रतिगृणाति
तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते यद्वै होताऽद्ध्वर्युमभ्याह्वयते वज्रमेनमभि
प्र वर्तयति पराङा वर्तते वज्रमेव तन्नि करोति ॥ [४१] ॥

(मद्ध्वर्युर्नैति वर्तयत्य ष्टौ च) ॥ ९ ॥

उपयामगृहीतोऽसि वाख्षसदसि वाक्पाभ्यान्त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽद्ध्य-
ख्षाभ्याङ्गृह्णाम्युपयामगृहीतोऽस्यृतसदसि चख्षुष्पाभ्यान्त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुव-
स्याऽद्ध्यख्षाभ्याङ्गृह्णाम्युपयागृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यान्त्वा क्रतुपाभ्यामस्य यज्ञस्य
ध्रुवस्याऽद्ध्यख्षाभ्याङ्गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष
ते सोमस्तꣳ रख्षस्व ॥ [४२] ॥ तन्ते दुश्चख्षा माऽव ख्यन्मयि वसुः पुरोवसुर् वाक्पा
वाचम्मे पाहि मयि वसुर्विदद्वसुश्चख्षुष्पाश्चख्षुर् मे पाहि मयि वसुः सय्ँयद्वसुः श्रोत्रपाः श्रोत्रम्मे
पाहि भूरसि श्रेष्ठो रश्मीनाम्प्राणपाः प्राणम्मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानम्मे पाहि
यो न इन्द्रवायू मित्रावरुणावश्विनावभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहन्तमधरम्पा-
दयामि यथेन्द्राऽहमुत्तमश्चेतयानि ॥ [४३] ॥

(रख्षस्व भ्रातृव्य स्त्रयोदश च) ॥ १० ॥

प्र सो अ॑ग्ने तवो॒तिभिः॑ सु॒वीरा॑भिस्तरति॒ वाज॑कर्मभिः। यस्य॒ त्वꣳ स॒ख्यमावि॑थ॥ प्र हो॒त्रे पू॒र्व्यँव्वचो॒ऽग्नये॑ भरता बृ॒हत्। वि॒पाञ्ज्योतीꣳ॑षि॒ बिभ्र॑ते॒ न वे॒धसे᳚॥ अग्ने॒ त्री ते॒ वाजि॑ना॒ त्री ष॒धस्था॒ ति॒स्रस्ते॑ जि॒ह्वा ऋ॑तजात पू॒र्वीः। ति॒स्र उ॑ ते त॒नुवो॑ दे॒ववा॑ता॒स्ताभि॑र् नः पाहि॒ गिरो॒ अप्र॑युच्छन्न्॥ सँव्वां॒ कर्म॑णा॒ समि॒षा ॥ [४४] ॥ हि॒नोमीन्द्रा॑विष्णू॒ अप॑सस्पा॒रे अ॒स्य। जु॒षेथा᳚ँय्य॒ज्ञन्द्रवि॑णञ्च धत्त॒मरि॑ष्टै॒र् नः प॒थिभिः॑ पा॒रय॑न्ता॥ उ॒भा जि॑ग्यथु॒र् न परा॑ जयेथे॒ न परा॑ जिग्ये कत॒रश्च॒नैनोः᳚। इन्द्र॑श्च विष्णो॒ यदप॑स्पृधेथान्त्रे॒धा स॒हस्रं॒व्वि तदै॑रयेथाम्॥ त्रीण्यायूꣳ॑षि॒ तव॑ जातवेदस्ति॒स्र आ॒जानी॑रु॒षस॑स्ते अग्ने। ताभि॑र् दे॒वाना॒मवो॑ यक्षि वि॒द्वानथा॑ ॥ [४५] ॥ भव॒ यज॑माना॒य शय्योः॑॥ अ॒ग्निस्त्रीणि॑ त्रि॒धातू॒न्या क्षे॑ति वि॒दथा॑ क॒विः। स त्रीꣳरे॑काद॒शाꣳ इ॒ह॥ यक्ष॑च्च पि॒प्रय॑च्च नो॒ विप्रो॑ दू॒तः परि॑ष्कृतः। नभ॑न्तामन्य॒के स॑मे॥ इन्द्रा॑विष्णू दृꣳहि॒ताः शंब॑रस्य॒ नव॒ पुरो॑ नव॒तिञ्च॑ श्नथिष्टम्। श॒तँव्व॒र्चिनः॑ स॒हस्र॑ञ्च सा॒कꣳ ह॒थो अ॒प्रत्य॒सु॒रस्य॒ वी॒रान्॥ उ॒त मा॒ता म॑हि॒षमन्व॑वेन॒दमी त्वा॑ जहति पुत्र दे॒वाः। अथा᳚ब्रवीद्वृ॒त्रमिन्द्रो॑ हनि॒ष्यन्थ्सखे॑ विष्णो वित॒रँव्वि क्र॑मस्व ॥ [४६] ॥

(इ॒षा ऽथ॑ त्वा॒ त्रयो॑दश च) ॥ ११ ॥

---

## समाप्ति कोर्वैः

(यो वै पव॑माना॒नां॒ त्रीणि॑ परि॒भूः स्फ्यः स्व॒स्तिर् भक्षेहि॑ मही॒नाम्पयो॑ऽसि॒ देव॑ सवित॒रे॒तत्ते᳚ श्ये॒नाय॒ यद्वै होतो॑पयामगृ॒हीतो॑ऽसि वाक्ष॒सत् प्र सो अ॑ग्न एका॑दश)
(यो वै स्फ्यः स्व॒स्तिः स्व॒धायै॒ नमः॒ प्रमु॑ञ्च तिष्ठ॒तीव॒ षट्च॑त्वारिꣳशत्)
(यो वै पव॑माना॒नां॒ विक्र॑मस्व)

॥ हरिः ॐ ॥

तृतीयकाण्डे द्वितीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ४६ |

ॐ